# sarasvatIstotram bRihaspativirachitaM

# શ્રીસરસ્વતીસ્તોત્રં બૃહસ્પતિવિરચિતમ્

## Document Information

Text title : sarasvatIstotram

File name : sarasvatistotrabrihaspati.itx

Category : devii, sarasvatI, stotra, devI

Location : doc_devii

Author : Brihaspati

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : rUdrayAmala

Latest update : June 30, 2004

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીસરસ્વતીસ્તોત્રં બૃહસ્પતિવિરચિતમ્

શ્રીગણેશાય નમઃ ।

બૃહસ્પતિરુવાચ

સરસ્વતિ નમસ્યામિ ચેતનાં હૃદિ સંસ્થિતામ્ ।
કણ્ઠસ્થાં પદ્મયોનિં ત્વાં હ્રીઙ્કારાં સુપ્રિયાં સદા ॥ ૧॥

મતિદાં વરદાં ચૈવ સર્વકામફલપ્રદામ્ ।
કેશવસ્ય પ્રિયાં દેવીં વીણાહસ્તાં વરપ્રદામ્ ॥ ૨॥

મન્ત્રપ્રિયાં સદા હૃદ્યાં કુમતિધ્વંસકારિણીમ્ ।
સ્વપ્રકાશાં નિરાલમ્બામજ્ઞાનતિમિરાપહામ્ ॥ ૩॥

મોક્ષપ્રિયાં શુભાં નિત્યાં સુભગાં શોભનપ્રિયામ્ ।
પદ્મોપવિષ્ટાં કુણ્ડલિનીં શુક્લવસ્ત્રાં મનોહરામ્ ॥ ૪॥

આદિત્યમણ્ડલે લીનાં પ્રણમામિ જનપ્રિયામ્ ।
જ્ઞાનાકારાં જગદ્વીપાં ભક્તવિઘ્નવિનાશિનીમ્ ॥ ૫॥

ઇતિ સત્યં સ્તુતા દેવી વાગીશેન મહાત્મના ।
આત્માનં દર્શયામાસ શરદિન્દુસમપ્રભામ્ ॥ ૬॥

શ્રીસરસ્વત્યુવાચ

વરં વૃણીષ્વ ભદ્રં ત્વં યત્તે મનસિ વર્તતે ।

બૃહસ્પતિરુવાચ

પ્રસન્ના યદિ મે દેવિ પરં જ્ઞાનં પ્રયચ્છ મે ॥ ૭॥

શ્રીસરસ્વત્યુવાચ

દત્તં તી નિર્મલં જ્ઞાનં કુમતિધ્વંસકારકમ્ ।
સ્તોત્રેણાનેન માં ભક્ત્યા યે સ્તુવન્તિ સદા નરાઃ ॥ ૮॥

લભન્તે પરમં જ્ઞાનં મમ તુલ્યપરાક્રમાઃ ।
કવિત્વં મત્પ્રસાદેન પ્રાપ્નુવન્તિ મનોગતમ્ ॥ ૯॥

ત્રિસન્ધ્યં પ્રયતો ભૂત્વા યસ્ત્વિમં પઠતે નરઃ ।
તસ્ય કણ્ઠે સદા વાસં કરિષ્યામિ ન સંશયઃ ॥ ૧૦॥

॥ ઇતિ શ્રીરુદ્રયામલે શ્રીબૃહસ્પતિવિરચિતં સરસ્વતીસ્તોત્રમ્
સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

---

*sarasvatIstotram bRihaspativirachitaM*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*